**KASHMIR SERIES OF TEXTS AND STUDIES.**
No. LXVIII.

---

THE
# PARĀTRIŚIKĀ LAGHUVRITTI
BY
## ABHINAVAGUPTA

---

EDITED BY
PANDIT JAGADDHARA ZĀDOO SHĀSTRI,
M. A., M. O. L., H. H.,
SUPERINTENDENT RESEARCH DEPARTMENT
HIS HIGHNESS' GOVERNMENT,
JAMMU & KASHMIR,
SRINAGAR.

---

Published under the authority of the Government of
His Highness Rājarājesvara Mahārājādhirāj
Sri MAHĀRĀJĀ HARISINGHJI BAHĀDUR,
G.C.S.I., G.C.I.E., K.C.V.O., LL.D.
MAHĀRĀJĀ OF JAMMU & KASHMIR.

SRINAGAR.
Printed at the Mercantile Press
1947 A.D.

( *All rights reserved* )

Published by
**Paṇdit Jagaddhara Zādoo Shastri,**
for the Research Department,
Jammu & Kashmir Government
Srinagar.

कश्मीर–संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६८

# श्रीपरात्रीशिका

महामहेश्वराचार्यवर्य्य–श्रीमदभिनवगुप्तपादकृत

अनुत्तरतत्त्वविमर्शिन्यपराख्यलघुवृत्त्युपेता ।

साच

श्रीराजराजेश्वर–महाराजाधिराज–कश्मीरनरेन्द्र–

श्रीहरिसिंहजी–बहादुराज्ञया

रिसर्चकार्यालयाध्यक्ष–पण्डितजगद्धरजाडूशास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन

संशोधनादिसंस्करणोत्तरं

संपाद्य

श्रीनगरे 'मर्कण्टाइल' नाम्नि मुद्रणालये मुद्रापयित्वा

प्राकाश्यमुपनीतम् ।

संवत् २००४ कश्मीर–श्रीनगर खैस्ताब्दः १९४७

(अस्य ग्रन्थस्य मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः

स्वायत्तीकृताः सन्ति)

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन् सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत् सर्ववन्द्यत्वमाप ॥१॥
तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्सवदायिनम ॥ २ ॥

# PREFACE.

The Parātrīśikā with two commentaries called 'Laghuvritti' and 'Vivriti' by Abhinavagupta and Rājānaka Lakshmī Rāma respectively are printed separately as Nos: LXVIII and LXIX of the present series. The following manuscript-material has been utilised in preparing the same.

## LAGHU VRITTI

A Devanāgarī manuscript on modern paper belonging to Rajanaka Lakshman Joo Brahmacharī of Srinagar. It consists of 29 leaves with 20 lines per page. Letters per line 25. size 11" × 9" Almost correct.

## VIVRITI.

क. A modern copy of the Research Department. Script Sarada of recent origion. Number of leaves 13 with 18 lines on an average per page, each line having 16 letters. Size $6\frac{1}{2}'' \times \frac{1}{2}''$. This manuscript happens to be abounding in spelling mistakes and omissions.

ख. A country-paper manuscript belonging to Dr. Shiv Nath Sastri, Ācharya, D.O.C., etc., of this Department. Script Śārada. Contains leaves 20. Lines per page 14 with 23 letters in a line; size $8'' \times 6''$. Almost correct. Date 1949 Vikrami.

The Parātriśikā with Abhinavagupta's commentary is an important work dealing with some of the fundamental doctrines of the Trika School. Even so the manuscripts of this work have become so rare in Kashmir that all our enquiry for a birch bark or paper manuscript could give us no information of any other copy except the manuscript kindly supplied by Rājānaka Lakshmaṇa.

We are indebted to Rājānaka Lakshmana Brahmachārī and Dr. Shiv Nath Sharma, Shastrī, Āchārya, D.O.C., etc., for their courtesy in lending their manuscripts of the Laghuvritti and Vivriti respectively for publication to this Department. It is hoped that both these gentlemen will enrich our series in future also by the rarities they possess.

The Editor.

# PARAṬRIŚIKA

## INTRODUCTION

The Trika manual entitled Pāratriśika, with two commentaries, is being presented in the following pages as Nos: LXVIII and LXIX of the Kashmir Series of Texts and Studies. The text forms a fraction of the Rudrayāmala which is one of the most authoritative and extensive Tāntric works. This work on account of giving the whole Tantra in summary has enjoyed a great popularity as is clearly borne out by the fact that it has attracted the attention of great authors like Somānanda, Abhinavagupta and others. It is a very early handbook and therefore of high authority to be quoted in discussions on the general character of the teaching of Trika and has, as such, long been the subject of study. This Āgama has been variously named as 1 Parātrīṃśika, 2 Parātriśikā, 3 Trikasūtra, 4 Trikāgama, 5 Anuttrasūtra, and together with the vivarana of Abhinavagupta it is called 6 Anuttaraprakriyā.

---

१. 'त्रिंशिकेत्यपि गुरवः पठन्ति', Vivaraṇa page 17.
२. 'अभिधेयं त्रीशिकेति', Vivaraṇa page 16.
३. 'श्रीत्रिकसूत्र इति त्रिकप्रमेयसूचिकायां श्रीपरात्रीशिकायामित्यर्थः', Tantrāloka – viveka
४. 'यथा वा इहैव श्रीत्रिकागमेषु', Vivaraṇa, page 119.
५. 'त्रिंशिका च अनुत्तरसूत्रम्',
६. 'अनुत्तरप्रक्रियायामिति श्रीपरात्रीशिकाविवरणादौ', Tantrāloka - viveka ix 313.

The investigations that the master-minds of mediaeval Kashmir have carried on in elucidating the Trika system of philosophy have resulted in a large number of commentaries on the Tantras and philosophical treatises. Works having a great bearing on this system have often been commented upon in two separate commentaries by one and the same author. Utpaladeva has exposed his Pratyabhijñā kārikas in two commentaries – Vritti and Vivriti. Similarly Abhinavagupta, the main exponent of this system, has penned down two commentaries named Vivaraṇa and Laghuvritti on the Parātrīśika. In Vivaraṇa *i. e.* the detailed commentary, Abhinavagupta has discussed the abstruse problem of Parā, Paśyantī, Madhyamā, Vaikharī and other allied topics in the lofty and pregnant language. The commentary bears ample testimony to the manysidedness and the encyclopedic nature of this learning. In order to meet the needs of average reader, the great Acharya has epitomized his Vivaraṇa in the present commentary and for this very reason it is called "Laghuvritti". This commentary is less terse but not more elaborate. Manifold interpretation as offered in the Vivaraṇa, has throughout been avoided and as such renders great help in understanding the text. The work attributed to Abinavagupta under the name Anuttara-tattva-vimarśinī, is no other than the present Laghuvritti.

It is hardly neeessary in this context to go into an elaborate investigation to prove that the present commentary is an epitome of the bigger Commentray i. e. Vivaraṇa, as Abhinavagupta has actually composed such gists of his encyclopædic works for average reader. In his Tantrasāra which is an aridgment of the Tantraloka, he says:

वितवस्तन्त्रालोको विगाहितुं नैव शक्यते सर्वैः ।
ऋजुवचनविरचितमिदं तन्त्रसारं ततः श्रृणुत ॥ २ ॥

One more reference in support of the above statement may be given here. Ishwara-partyabijña vimarsina is an obridgment of the Iśvarapratyabhijnā-vivriti-vimarśini by the present author. The main cause for epitomozing the detailed commentary is given by Bhāskara, who says:

'ततः सर्वजनहितार्थं श्रीमताभिनवगुप्ताचार्येण बृहत्प्रत्यभिज्ञाख्या बहुविस्तरा टीका कृता । तद्विचारणे च जनमशक्तं ज्ञात्वा तेनैव प्रत्यभिज्ञाकारिकासूत्रेषु सङ्ग्रहमयी विमर्शिनीति प्रसिद्धा टीका कृता'

(Bhāskari, Vol. I. P. 3)

There is sufficient internal evidence available in the Vivaraṇa to prove that the author has based his exposition on the Vivriti of Somānanda, as he explicitly says:

(1) तद्ग्रन्थिनिर्दलनार्थं एवायमस्माकं तच्छासनपवित्रितानां यत्नः (Page 16 Vivaraṇa)

(2) श्रीसोमानन्दमतं विमृश्य मया निबद्धमिदम् ।
(Vivaraṇa Page 282)

On the other hand the present commentary is based on the Tantrasāra of Utpaladeva as is

distinctly stated in the introductory verses:

श्रीमदुत्पलदेवीयं तन्त्रसारं तु वर्ण्यते ॥ २ ॥

It would naturally be expected that reference from the Tantrasāra of Utpaladeva could be found in the same way as quotations are available in the Vivaraṇa from the Vivritti of Somananda at pages 16, 52, 59, 63, 90 and 207. But no such quotations are forthcoming. Lines from the Tantrasāra have been quoted in the Vivaraṇa. But this work is of Āgamic nature, and therefore cannot have been written by Utpala. This raises a great doubt about the interpretation of the above mentioned line that the present commentary is an amplification of the tenets as laid down by Utpaladeva in his treatises. Whether we would be warranted in actually regarding the Tantrasāra as an independent work by Utpaladeva may be left over for future investigation.

Abinavagupta in this encyclopaedic work Tantraloka makes a specific reference to some authors namely Somananda, Kalyana and Bhavabhuti who also have commented upon the present text. He refers with reverence to them in the following stanza:

श्रीसोमानन्दकल्याणभवभूतिपुरोगमाः ।
तथाहि त्रीशिकाशास्त्रविवृतौ तेऽभ्यधुर्बुधाः ॥

(Tantraloka. – XIII. 149.)

Maheśvarananda frequently quotes lines with slight variations from the present work to back up his statements in his Parimala a commentary on the Mahārtha-manjarī. These quotations are being noted here for comparison and ready reference:

| PARIMALA | LAGHUVRITTI |
|---|---|
| 1. Page, 8 : | |
| सदाभिनवगुप्तं यत् | |
| पुराणं च प्रसिद्धिमत् । | |
| हृदयं तत् परोल्लासैः | |
| स्वयं स्फूर्जत्यनुत्तरम् ॥ | Page, 1. |
| 2. Page, 169 : | |
| श्रीदेव्युवाचेत्यादौ स्वा· | |
| त्मदेवतैव प्रबुध्यमाना- | |
| वस्थायामात्मानं पराम· | |
| र्शेनानवरतं पृच्छति ' | Page, 1 |
| 3. Page, 54 : | |
| पुरुषस्य हि संवेद्यरूपस्यैव | |
| परिमितस्य वेद्यराशौ गणनम् ' | Page, 6. |
| 4. Page, 174 : | |
| एतद्यो लभते स लाभ· | |
| काल एव न पशुः । | Page, 10. |
| 5. Page, 174 : | |
| अभ्यासेन विनापि | |
| जीवन्मुक्तता परा | |
| कौलिकीसिद्धिः । | Page, 10. |
| 6. Page, 118: | |
| पुष्पैर्हृदयान्तःस्वरूपस· | |
| मर्पणादेव हृदयस्य | |
| पोषकैर्बाह्याभ्यन्तरैः | |
| सर्वैर्द्रव्यैः ' | Page, 22. |

Abhinavagupta's date is too well known to require any discussion here. He flourished between the latter part of the 10th and the 1st quarter of the 11th century of the Christian era.

Following is the list of works composed by Abhinavagupta which have either been printed or known from references in his existing works.

1. Bodha - panchadaśika.
2. Malinīvijaya - vārtika.
3. Parātrimśika - vivriti.
4. Tantrāloka.
5. Tantrasāra.
6. Tantravatāvadhānikā.
7. Dhvnyāloka - lochana.
8. Abhinava - bhārati.
9. Bhagavadgītārtha - Saṇgraha.
10. Paramārtha - sāra.
11. Iśvarapratyabhijnā - vivriti - vimarśinī.
12. Iśvarapratyabhijnā - vimarśini.
13. Kramastotra.
14. Dehastha - devatā - chakra - stotra.
15. Bhairava - stotra.
16. Paramartha - dvadaśikā.
17. Paramartha - charcha.
18. Mahopadeśa - vimśatikā.
19. Anuttarashṭikā.
20. Anubhava - nivedana.
21. Ghatakarpara - kāvya - viviti.
22. Krama - keli.
23. Śivadrishtyālochana.
24. Srīpurva - panchika.
25. Padārthapraveśa - nirnaya - tīka
26. Prakīrṇaka - vivarana.
27. Prakaraṇa - vivarana
28. Kāvyakautuka - vivarana.
29. Kathāmukha - tilaka.
30. Laghvi - prakriyā.
31. Bhedevada - vidaraṇa.

32. Devīstotra - vivarana.
33. Tattvādhvau - Prakāśikā.
34. Sivaśaktyavinabhāva - stotra.
35. Anuttara - tattva - vimarśinī (Laghu-vritti).
36. Raurava - vichāra.
37. Rahasya-panchadaśikā.

Rājānaka Lakshmī Rama alias Lasa Kāka has also composed a breifer and simpler commentary on the Parātrīśika which is printed along with this volume as No: LXIX of the present Series. His date Śaka 1732 is known from a verse at the end of his commentary, on the Bhagavadgīta, styled Tattva-prakāśika:

लक्ष्मीराम इति द्विजोऽत्र निवसन् कश्मीरभूमण्डले
मेरामातुरुपात्तदेहजननो राजानगोपालकात् ।
श्रीशाके द्विगुणाद्रिभूपरिमिते मासे तथैवाश्विने
शुक्लायां प्रतिपद्यजाङ्घ्रिनिरतो गीतासु टीकां व्यधात् ।

J. D. Zadoo.

**Board of Editors.**

1. J. D. Zadoo, Shastri, M.A.M.O.L, H.H.

2. Dr. S. N. Sharma, Shastri, Acharya, D.O.C., etc.

3. Pt. Sri Kanth Shastri, B.A., H.H.

———o———

# परात्रीशिकालघुवृत्तिः ।

## महामाहेश्वराचार्यवर्य–श्रीमदभिनवगुप्तरचिता ।

यत्र तेजसि तेजांसि तमांसि च तमस्यलम् ।
तेजांसि च तमांस्येतद्वन्द्वे ज्योतिरनुत्तरम् ॥ १ ॥
सदागमप्रवाहेषु बहुधा व्याकृतं त्रिकम् ।
श्रीमदुत्पलदेवीयं तन्त्रसारं तु वर्ण्यते ॥ २ ॥
सदाभिनवगुप्तं यत्पुराणं च प्रसिद्धिमत् ।
हृदयं तत्परोल्लासैः स्वयं स्फूर्जत्यनुत्तरम् ॥ ३ ॥

तत्र स्वात्मदेवतैव प्रबुध्यमानावस्थायां स्वात्मानं परामर्शांशेनावतरन्तं पृच्छति । तत उच्यते "श्रीदेव्युवाच" इति । किं पृच्छति ? तदाह–

अनुत्तरं कथं देव स्वतः कौलिकासिद्धिदम् ।
येन विज्ञातमात्रेण खेचरीसमतां व्रजेत् ॥ १ ॥

हे स्वात्मरूप देव सर्वत्र ज्ञाने करणे च प्रथमम-भिमुखीभूत, तव तावदनुत्तरं रूपम् उत्तरम् उत्कृष्टमुपरिवर्ति, तच्च जडापेक्षया ग्राहकरूपम् । तस्य तु चिद्रात्मनः स्वप्रकाशस्य न ग्राहकान्तरमस्तीति अनुत्तरत्वम् ।

तेन अनुत्तरं संविद्रूपं सदा सर्वत्रावभासितं पूर्वापरदेश-कालविहीनमनपह्नवनीयम्, किं तत्रोच्यताम्। इदं तु तत्रोच्यते तत्किल कथं केन प्रकारेण कौलिकस्य कुलसमूहस्य देहाक्षभुवनादेः अपूर्वरूपस्य स्वतः स्वतन्त्रतः सिद्धिं उभयेन्द्रियसंवेद्यतया अभिव्यक्तिं ददाति; 'दा दाने' 'दोऽवखण्डने' इति च धातुगत्या सृजति संहरति चेत्यर्थः। अनुत्तरं चिदेकरूपं सत् कथं नवनवेन अत एव पर्यनुयोज्येन वेद्यवेदनवेदकादिभेदेन भातीत्यर्थः। ननु किमेतेन। ज्ञातेनानेन प्रकारेण ज्ञातमात्रेण खेचरी बोधभूमिसंचारिणी सती इयं संविच्छक्तिः [1]समताम् अविकल्पत्वं पूर्णत्वमात्मनो व्रजेत् गच्छेज्जानीयात्। [2]तत्प्रकारापरिज्ञाने तु न खेचरी अबोधरूपे वेद्यांशे संचरणात्। तत एव वेद्यैः नीलादिभिर्नियन्त्रितेति न पूर्णशक्तिः। किंच धारणादिक्रमेण प्राणयोगादिकृताः सिद्धयः सन्ति अनुत्तरं संविन्मात्ररूपमक्रमं कथं कौलिकसिद्धिं सक्रमां ददाति येन ज्ञातमात्रेण देवीरूपत्वं व्रजेत् ॥ १ ॥

एतद् गुह्यं महागुह्यं कथयस्व मम प्रभो ।
हृदयस्था तु या शक्तिः कौलिनी कुलनायिका ॥ २ ॥
तां मे कथय देवेश येन तृप्तिं व्रजाम्यहम् ।

एतदप्रकटमतिशयेन महत् उत्कृष्टमगुह्यं स्वप्रकाशं यथा भवति तथा कृत्वा प्रभो [3]आच्छादने स्वरूपस्य प्रकटने च प्रभवनशील हे स्व स्वात्मन् मम पृच्छन्त्याः संविद्रः

---

१ तत्समतामिति पाठान्तरम् । २ तत्प्रकारेऽपरिज्ञाते तु इति पाठान्तरम् ।
३ निजस्वरूपस्याच्छादकप्रकटनेनाच्छादनैकरूप, प्रकटनेन च प्रमातृरूपत्वात्प्रभवनशीलेति पाठान्तरम् ।

कथय विमर्शपदवीं [1]वाक्यप्रबन्धपर्यन्ततामानय । ननु ग्राहकरूपं सर्वस्य हृदये स्फुरति, तत्र किं प्रश्नेन । [2]सत्यं, स्फुरितमपि न तत्त्वतो हृदयङ्गमीभूतम् । हृदयङ्गमीभावेन विना भातमप्यभातमेव रथ्यागमने तृणपर्णादिवत् । हृदयङ्गमतावगमनसाध्या हि तृप्तिर्जीवन्मुक्तता, तत्समावेशसाध्या हि तृप्तिर्विभूतिरूपेति द्विविधा तृप्तिः परामर्शेन विना न भवतीति युक्त एव प्रश्नः । तदेव दर्शयति । हृदयस्था हृदये संविद्रूपे स्थिता या स्वातन्त्र्यलक्षणा शक्तिर्यस्याः कुलं ग्राह्यग्राहकग्रहणचक्रं निर्मेयत्वेन प्रयोजनं तत एव कौलिनी । तस्य निर्मितस्य कुलस्य नायिका सा अधिष्ठात्री, तद्भेदनेन तदवभासनकर्त्री च तत्स्वरूपसंहर्त्री च । तां मे कथय परामर्शपदवीं नय । येन परामृश्यतानयेनन तृप्तिं भुक्तिमुक्तिरूपां व्रजाम्यहमिति संवेदनरूपां कथयेति णिचौ । एवं प्रबुध्यमानरूपा संवित् यदा प्रश्नं निर्भृतावभासमानपरमार्थस्वरूपं करोति, तदा प्रबुद्धावस्थाप्रतिपत्तौ सैव पूर्णरूपा भैरवदेवतात्मिका प्रतिवचनदात्री संपद्यते । नच [3]अत्र पदंप्राथमिकत्वं कदाचित् अपितु पुरातनमेव तत्परमावर्तमानं कालभेदकल्पनया भातीति भूतत्वेन व्यवह्रियते ॥ २ ॥

[4]दिव्यरूपत्वेन प्रत्यक्षाभावात्परोक्षेण तदेतदुच्यते

श्रीभैरव उवाच ।

**शृणु देवि महाभागे उत्तरस्याप्यनुत्तरम् ॥ ३ ॥**

**कथयामि न सन्देहः सद्यः कौलिकसिद्धिदम् ।**

---

[1] वाक्यजन्यपर्यन्ततामिति पाठान्तरम् । [2] सत्यं स्फुरतीति पाठान्तरम । [3] न चात्रेच्छां प्राथमिकीं काचिदित्यपि पाठः । [4] वेद्यत्वेन चेत्यपि पाठः ।

कौलिकोऽयं विधिर्देवि मम हृद्व्योम्न्यवस्थितः ॥४॥

[1]महान् भागः प्रबुद्धत्वावस्थायामुज्जिगमिषालक्षणा यस्याः सा त्वमेवंभूता शृणु स्फुटमवधारय। [2]अहमुत्तरस्यापि ग्राहकस्यापि यदनुत्तरं रूपम्। अपिशब्दाद् ग्राह्यग्रहणादेरपि। कौलिकसिद्धिदं [3]विश्वावभासनादिभोगापवर्गतृप्तिप्रयोजनं। तत्कथयामि तच्च हृदयङ्गमतां नयामि। यथा सद्य एव अवधारणमात्रे संपन्ने एव पुनरत्र सन्देहो न भवति। यस्मात् अयमिति भासमानो यः कौलिको विधिः स मम हृदयाकाशे हृदयत्वेन सदा विदितः सन् चिदात्मतया तावदास्ते।

"सदेव सौम्येदमग्र"... 'एकमेवाद्वितीयं'... 'तदैक्षत" इत्यादिश्रुतेः ॥ ४ ॥

ततश्च

अथाद्यास्तिथयः सर्वाः स्वरा बिन्द्ववसानकाः।
तदन्तः कालयोगेन सोमसूर्यौ प्रकीर्तितौ ॥ ५ ॥
पृथिव्यादीनि तत्त्वानि पुरुषान्तानि पञ्चसु।
क्रमात्कादिषु वर्गेषु मकारान्तेषु सुव्रते ॥ ६ ॥
वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम्।
तदूर्ध्वे शादि विख्यातं पुरस्ताद् ब्रह्मपञ्चकम् ॥७॥
अमूला तत्क्रमा ज्ञेया क्षान्ता सृष्टिरुदाहृता।
सर्वेषां चैव मन्त्राणां विद्यानां च यशस्विनि ॥ ८ ॥

---

१ महानुभवैकप्रबुद्धेति पाठान्तरम्। २ यतोऽहमुक्रस्येति पाठान्तरम्।
३ विश्वावभासकादिभोगेति पाठान्तरम्।

इयं योनिः समाख्याता सर्वतन्त्रेषु सर्वदा ।

इह पदार्थप्रकाशनमेव तावत् संवेदनं प्रसिद्धम् , पदार्थश्च ज्ञातृज्ञेयस्वभावः, तत्र ज्ञातृता नाम उन्मेषनिमेषलक्षणेन संकोचविकासात्मज्ञानक्रियालक्षणेन स्वभावेन स्वपरिस्पन्दनसारा नतु परिनिष्ठिता । परिच्छिन्नजडरूपघटादितुल्यस्य च संकोचविकासयोगः कथम् । त्रिकोणं हृदयस्पन्दनादिषु यथायथा स्फुटीभवति तथातथा ज्ञातृत्वमुत्कृष्यते ।[1]या बहिरिव संविदि यथायथा न्यूनीभवति, तथातथा तन्निकृष्यते । यावज्जडपाषाणादौ स्वयं संकोचविकासलक्षणो विसर्गः स्वातन्त्र्यात्मा भगवतोऽनुत्तरस्य शक्तिः । तेन भैरवसंघट्टविश्रमणोदयपरमार्थशिवशक्तिस्वरूपं रुद्रयामलमुच्यते । संकोचविकासयोगे एव मध्ये अनुत्तरः, आनन्दः, इच्छा, ईशना, उन्मेषः, ऊनता, इच्छेशनयोरस्फुटस्फुटवेद्योल्लासः ऋ ॠ ऌ ॡ भवति, तयोरिच्छेशनयोरनुत्तरानन्दाभ्यां सन्धीयमानत्वात् ए ऐ, उन्मेषोनतयोस्ताभ्यामेव तथाकृतत्वात् ओ औ इति भवति, तदनन्तरं वेद्यजातस्य वेदकात्मकबिन्दुस्वरूपसंस्कारशेषत्वमित्यनेन रूपेण परिपूर्णं[2] भवति, इत्येवं पूर्णानन्दचिद्रूप[3]विसर्गशक्तिमयं परभैरवयामलम् । तत्र विसर्गरूपता सामान्याकारा विशेषेषु पञ्चदशस्विति पृथग् गणनार्हा न भवति । एवं कौलिको विधिर्मम तावद् हृदि संविद्रूपतादात्म्येनावस्थितः । अथानन्तर[4]मिदंपरामर्शमाहिम्ना प्रसरन्ति ये अकाराद्या बिन्दुपर्यन्ताः

---

१ ज्ञातृतेत्यर्थः । २ पूर्णो भवतीत्यपि पाठः । ३ विसर्गशक्तिमयपरभैरवेति पाठान्तरम् । ४ इदमिति पदं नास्ति क. पुस्तके ।

स्वराः, त एव परमानन्दरूपस्य स्थितिं पूरयन्तीति तिथय उक्ताः । एवं सा बोधचन्द्रस्य प्रकाशानन्दमयस्यानुत्तरस्य विमर्शशक्तिः पञ्चदशभिस्तिथिभिः पूर्यते । ते चैते सर्वे स्वराः शब्दनस्वरूपाः [1]परमार्थात्मानो जगदपेक्षया स्वयं राजन्तः स्वप्रकाशाः तेषामन्तः सोमसूर्यौ संकोचविकासौ तदात्मा तेषां तदन्तः तेषामन्तः बिन्दुद्वयात्मा विसर्ग इति यावत् । ततः सर्वेष्वेतेषु कालेन संकलनात्मना परामर्शनयोगः । ततो हेतोः । परामर्शो हि स्पन्दनात्मैव, नतु परिनिष्ठिताचलजडरूपः । बहिरपि च सोमसूर्यौ रात्रिदिवससंकोचविकासरूपेण तिथिपञ्चदशकस्य अन्तः [2]चरतः इति । इयं सा भगवती परामर्शशक्तिः। यश्च असाविच्छायामीशने च वेद्योल्लासः स एव पृथग्भवन् स्थूलतया भूतपञ्चकात्मा सूक्ष्मत्वेन च तन्मात्रपञ्चकात्मेति दश तत्त्वानि, पृथिवी जलं तेजोवायुराकाशः गन्धो रसो रूपं स्पर्शः शब्द इति । स एव वेद्योल्लासः करणतया सृज्यमानानीन्द्रियाणि तत्तत्क्रियाशक्तिप्रधानानि उपस्थपायुपादपाणिवागादीनि कर्मेन्द्रियाणि [3]ज्ञानशक्तिप्रधानानि बुद्धीन्द्रियाणि घ्राणरसनाचक्षुस्त्वक्श्रोत्रमिति । ततो वेद्यतायाः क्रमेण संसारे वेदनाभसस्योल्लासे मनोऽहंकारः बुद्धिः प्रधानं पुरुषः । तथा पृथिव्यादीनि पुरुषान्तानि कादिषु मान्तास्विति । पुरुषस्य च [4]संवेद्यरूपस्यैवोपरि मान्तस्य वेद्यराशौ गणनम् । तेन हि विना पृथिव्यादि वेद्यं कथं भवेत् । [5]तेन वेद्याभासस्यैवेयद्रूपं यद्वेद्यराशेरेव अत्यक्तवेद्यभावस्य भिन्न-

---

१ परमार्थात्मनो इति पाठान्तरम् । २ तिथिपञ्चदशकस्यान्तः चरन्तः इति पाठान्तरम् । ३ ज्ञानशक्तिप्राधान्यानीति पाठान्तरम् । ४ संवेद्यरूपस्यैवोपरिमाणस्येत्यपि पाठः । ५ न वेद्याभासस्यैवेदं रूपमिति पाठान्तरम्।

वेद्यवेदकैकीकरणम् । तद्व्यावृत्तानि तत्त्वानि । कला वायुरूपा किंचित्कर्तृत्वेन प्रेरिका । अशुद्धविद्या तेजोरूपा किंचिज्ज्ञत्वेन प्रकाशिका च । माया सलिलरूपा अभिष्वङ्गरूपनिमज्जनात्मकस्तम्भनस्वभावा । इन्द्रोपलक्षिता पृथिवीरूपा रागशक्तिः । ता एताश्चतस्रः शक्तयः पुरुषं धारयन्ति मध्ये त्रिशङ्कुवद्[1]विश्रमयन्ति, अन्यथा पाषाणादिवत् जडभूमिमेवापतेत्परमेश्वरवद्वा संविद्गगनमेवापतेत् । उभयथापि मायाप्रमातृताभावे वेद्यमपि न किंचिदिति, संकोचविकासावपि न कौचित्, संकोचेन विना [2]विकासस्याप्ययोगात् । तद्विसर्गरूपेण संकोचविकासात्मना इदं सर्वमाक्षिप्तं । यत् [3]वेद्यसृष्टिः समुचि(दि)तवेदकसृष्टिश्चेति । आकाशशक्त्या[4] तु नात्र मायाप्रमातृताधीनं प्रयोजनमस्ति । सा हि अन्तर्लीना पुरुषस्य [5]वेद्यशून्यतया वेद्यावकाशसहिष्णुतया च [6]प्रमातृत्वात् तदीया नित्या विमर्शशक्तिः । यदा तु वेद्यतायाः क्रमेण प्रच्छादनं संविद्रूपस्य च प्रथनं, तत्र तावत् धृतिः, तद्रूपस्यैव आप्यायनं, तत्प्रकाशयोगः । तत्रैव परमस्वातन्त्र्यलाभात्मकं स्पन्दनं सर्वत्र तेनैव रूपेण व्याप्तम् । इत्येतद् बृंहकं स्वरूपस्य पूरकं व्यापकं पञ्चकं शादीनां विद्येश्वरसदाशिवशक्तिशिवलक्षणं सूक्ष्मपृथिव्यप्तेजोवाय्वाकाशरूपं, सद्योजातवामदेवाघोरतत्पुरुषेशानरूपं ब्रह्मपञ्चकशब्देनाख्यातमिति । एवमसौ [7]परापररूपा [8]विसर्गशक्तिः । तथाभूतश्च [9]पञ्चकरूपं पुनरप्यनुत्तरविश्रान्तम् । तदेवं [10]विसर्गशक्तिरेव "अथाद्या"

---

१ विश्रामयन्तीति पाठान्तरम । २ विकासस्याप्यभावादिति पाठान्तरम् वेद्यसृष्टिश्चेति इति पाठान्तरम् । ४ आकाशशक्त्यात्मेति पाठान्तरम् । वेद्यत्वेति पाठान्तरम् । ६ प्रमातृरूपत्वादिति पाठान्तरम् । ७ श्रीपरापररूपेति पाठान्तरम् । ८ विमर्शशक्तिः इति पाठान्तरम् । ९ भूतपञ्चकरूपमिति पाठान्तरम् । १० तथैव विमर्शशक्तिमयमित्यपि पाठः ।

इत्यादिना "ब्रह्मपञ्चकम्" इत्यन्तेनैव वपुषा विकसतीति। तदिदं शक्तिचक्रमविच्छिन्नप्रबन्धं भगवतो भैरवनाथस्य। अनुत्तरेच्छोन्मेषत्रिकोण[1]विसर्गशक्तयः एव हि पञ्चभेदवत्य[2]श्चिदानन्देच्छाज्ञानक्रियाशक्तयो वाच्यभूतपञ्चकशक्तिमय्यः इति। ततश्च सर्वमेतदविभागपरामर्शरूपं प्रथमतः, ततो विभागपरामर्शात्मना पञ्चाशद्विमर्शरूपं परामृश्यरूपेण तु [3]कर्मतां प्राप्तं बहिस्तत्त्वजालं जायते। तस्य परामर्शात्मतैव जीवितम्। सा च मातृकारूपा। अत एव सर्वेषां मन्त्राणां गुप्तार्थभाजां [4]बीजापिण्डात्मनां चतुष्कलनवात्मादीनां पुरुषरूपवाच्याध्यवसितानाञ्च विद्यानां संवेद्यमानस्फुटार्थरूपाणां "नमःशिवाय" इत्यादिमालामन्त्राणां स्त्रीरूपवाच्याध्यवसितानां च सर्वेषामियं योनिः अविभागपरामर्शतारूपं कारणम्। सर्वेषु शिवरुद्रादिरहस्यतन्त्रेषु यत्किंचिदुच्यते तत्सर्वं इत एवोदेति। [5]यत्किल परावर[6]सिद्धिदं रूपं तत्सर्वं तत्त्वषट्त्रिंशत्यां[7] लभ्यते। तस्याश्च परामृश्यं यज्जडरूपं शरीरस्थानीयं तस्य परामर्शता जीवितं, सा च अस्यां भगवत्यामिति इथमेव सर्वं ददाति। अत एवेह भगवत्याः प्रष्टृरूपत्वम्। अनयैव हृदयङ्गमतया "यशस्विनि" इति [8]प्रसिद्धम्। इयता विश्वात्मरूपेण प्रसिद्धा जातेति 'यशस्विनी'त्यामन्त्रणम्। एषा च सा त्रिविधा सृष्टिरकारमूला हकारपर्यन्ता अनुत्तररूपा [9]प्रसृतिः पुनरपि शिवात्मन्येव[10] विश्रान्तिद्वारेण

---

१ विमर्शशक्तय इति पाठान्तरम्। २ पंचभेदवत इति पाठान्तरम्। ३ तूत्तरतां प्राप्तमिति पाठान्तरम्। ४ बीजात्मगतानामिति पाठान्तरम्। ५ यत्किंचिदिति पाठान्तरम। ६ परासिद्धिरूपमिति पाठान्तरम। ७ त्रिंशत्येति पाठान्तरम। ८ प्रसिद्धमिति इति पाठान्तरम। ९ अनुत्तररूपात्प्रभृति इति पाठान्तरम। १० "शिवात्मन्येवानुत्तरधाम्नि" इति पाठान्तरम्।

तत्रैवानुत्तरधाम्नि विश्रमणं यस्याः सा तथाभूता उदाहृता ज्ञेया सती । अनयाभिज्ञातया तदनुत्तरस्पन्दस्वरूपं सुष्ठु ज्ञातं भवतीति यत्किल तदनुत्तरमिति यावत् । एवं हृदयस्था पूर्वमविभागपरामर्शरूपा[1]शक्तिः विभागपरामर्शतां कौलिकसिद्धिरूपतामनेनैवानुत्तररूपस्वातंत्र्येण प्रतिपद्यते इति निर्णीतं शिवरुद्ररहस्यादितन्त्रेषु ॥ ८ ॥

नन्वविभागपरा[2]मर्शे पृथग्विभागपरामर्शमूलभूते हृदयस्वरूपे [3]सति न निवृत्तः सन्देहः ? इत्याशङ्क्यादिशति

चतुर्दशयुतं भद्रे तिथीशान्तसमन्वितम् ।
तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः ॥ ६ ॥

चतुर्दशेन स्वरेण परिपूर्णानुत्तरानन्दशालिना संपूर्णक्रियाशक्तिशरीरोन्मेषोनत्वसंपदा क्रियाशक्तिद्वारान्त[4]र्लीनेच्छाज्ञानयुगलेन युतं सततं मिश्रीभूतं यदिदं तृतीयं ब्रह्म सदाशिवतत्त्वा[5]त्मकं ग्राह्यराशिविलक्षणं सद्रूपं विश्वं तत् तिथीशानां– पञ्चदशानां स्वराणां [6]योऽन्तः पर्यन्तस्थितिभूतो विसर्गः तस्मिन् सम्यक् अवियोगेन अन्वितं विश्रान्तं सत् भैरवात्मनो भगवतः शब्दराशेः विश्वशरीरस्य हृदयं सारभूतम् । यथा हि सर्वतत्त्वमयशरीरस्य विभक्तत्वगादिसन्तानतान्त्रितस्य[7] तदविभागप्रकाशविमर्शविश्रान्तिधाम हृदयपदमुच्यते, तथैव भगवतो भैरवनाथस्य तदिदं विभक्ततत्त्वभुवनादिमयं विश्वरूपं परामर्शसारं पञ्चाशद्वर्णमयं शरीरं

---

१ शक्तिः, सा विभागेति पाठान्तरम् । २ परामर्शस्यत्वेपि पाठः । ३ सतीति पदं नास्ति क. पुस्तके । ४ तदुक्तं [" अस्मिंश्चतुर्दशे धाम्नि स्फुटीभूतत्रिशक्तिके । त्रिशूलत्वमतः प्राह शास्ता श्रीपूर्वशासने ॥ तं० लो० । "] ५ सदाशिवतत्त्वात्मकमघोरप्रकाशस्वरूपमस्फुटीभूतेदन्तात्मकग्राह्यराशिलक्षणमिति पाठान्तरम् । ६ यतो निश्चय इति पाठान्तरम् । ७ यंत्रितस्येति पाठान्तरम् ।

तस्य तदविभागपरामर्शसारमिदं हृदयम् । भो भगवति सुश्रोणि ! विश्रान्तपरमानन्दमयधामशक्तित्रयगतानवरतसङ्कोचविकासरूपत्रिकोणपरिस्पन्दनरूपमेतद् हृदयं भैरवात्मनो भैरवस्य आत्मभूतायास्तदविभागवत्याः श्रीपरादेव्याः [1]तत्त्वं भवति । अनुत्तररूपा संवित् तावत्, बीजात्मनो [2]प्रथमस्वरकोट्योः स्वरूपविश्रान्तिसतत्त्वयोः परिस्पन्देन तत्स्पन्दनप्रभावादेव मध्यकोटौ विभक्तपरामर्शात्मना सृष्टिरूपेण समस्ततत्त्वम[3]थीति । अत एव वक्ष्यते "सृष्टिं तु संपुटीकृत्य" इति ॥ ६ ॥

एतन्नायोगिनीजातो नारुद्रो लभते स्फुटम् ।
हृदयं देवदेवस्य सद्यो योगविमोक्षदम् ॥ १० ॥

एतत् बीजं यो लभते स लाभकाल एव न पशुः; यतोऽस्मिन् लब्धे एतत् हृदयं [4]जायते । एतद्धृदयतैव भैरवत्वम् । [5]ततो रुद्रयोगिनीयामलेन [6]यावत् न जातं शक्तिस्वरूपोन्मीलनं तावद् एतद्धृदयं[7] कथमस्योन्मीलति । अस्मिन्नुन्मीलिते सत्यऽनेन हृदयेन सहयोगः । एतद्धृदयलाभः श्रीभैरवयामलसमावेशलक्षणो जीवत एव विमोक्षद इति उन्मीलनमात्रे जीवन्मुक्ततालक्षणा परा कौलिकी सिद्धिरनुत्तरे संविन्मात्ररूपे यथा विधीयते, तथा दर्शितम् ॥ १० ॥

अधुना येन प्रकारेण अपरा अपि सिद्धयो विभूतिलक्षणाः संवित्परिस्पन्दपरामर्शबलात् प्राणनाडिकालवेलामन्त्रविद्याचर्यादिविडम्बननिरपेक्षात् भवन्ति, तं प्रकारमुपक्र-

---

१ एतत्तत्त्वं भवति क. पाठः । २ स्पन्देन प्रथमेति पाठन्तरम् । ३ मथैवेति पाठान्तरम् । ४ ज्ञायते इति पाठान्तरम् । ५ अथेति पाठान्तरम् । ६ योजनत इति पाठान्तरम् । ७ हृदयप्रकाशमुन्मीलनं मीलयतीति पाठान्तरम् ।

मपूर्वं दर्शयति—

अस्योच्चारे कृते सम्यङ् मन्त्रमुद्रागणो महान् ।
सद्यः सन्मुखतामेति स्वदेहावेशलक्षणम्[1] ॥ ११ ॥
मुहूर्तं स्मरते यस्तु चुम्बके नाभिमुद्रितः ।
स बध्नाति तदा देहं मन्त्रमुद्रागणं नरः ॥ १२ ॥
अतीतानागतानर्थान् पृष्टोऽसौ कथयत्यपि ।
प्रहराद्यदभिप्रेतं देवतारूपमुच्चरन् ॥ १३ ॥
साक्षात् पश्यत्यसन्दिग्धमाकृष्टं रुद्रशक्तिभिः ।
प्रहरद्वयमात्रेण[2] व्योमस्थो जायते स्मरन् ॥ १४ ॥
त्रयेण मातरः सर्वा योगेश्वर्यो महाबलाः ।
वीरा वीरेश्वराः सिद्धा बलवान् शाकिनीगणः ॥१५॥
आगत्य समयं दत्त्वा भैरवेण प्रचोदिताः ।
यच्छन्ति परमां सिद्धिं फलं यद्वा समीहितम् ॥१६ ॥

एतत् संवित्तत्त्वं हृदयङ्गतां चेत् प्रतिपन्नं तदा जीवन्मुक्तेति उक्तम् । यदा तु तदेव प्राणबुद्धिभूमिषु सिद्धरसविध्यमानधातुन्यायेन समावेशक्रमेणैतद्हृदयात्मकपरामर्शपात्रतापादनया प्राणबुद्ध्यादिजडिमन्यक्कारिण्या प्रसरद्रूपमभ्यासदशां संपाद्यते, तदास्य स्वविमर्शावेशाभ्यासादेव नाडीप्राणजयादिशास्त्रान्तरीययोगनिरपेक्षा एव अपरा अपि सिद्धयो विभूतिरूपाः कौलिकस्य सिद्धयो जायन्ते इति तात्पर्यम् । अस्य बीजस्योच्चारे प्राणरूपतायां समावेशेन तावत्कृतमात्र एव ज्ञानक्रियाशक्तिशरीरा मन्त्रमुद्राः सद्य एव

---

१ परशरीरस्येति पाठान्तरम् । २ प्रहरद्वयमिति पाठान्तरम् ।

संमुखतामुच्चारयितुराभिमुख्यं प्रतिपद्यन्ते । कथम् स्वदेहावेशलक्षणं कृत्वा । तेन हि प्राणेन स्वदेहोऽप्याविश्यते । ततश्च संपूर्णज्ञानक्रियात्मक[1]हृदयरूपान्तर्लीनीकृतेन प्राणनाऽधिष्ठितो देहोऽपि तद्हृदयरूपतासमाविष्टज्ञानक्रियात्मिकाभिर्मन्त्रमुद्राभिराविश्यते तावत्तावदुपक्रमो विभूतीनां मन्त्रमुद्रायत्तत्वादिति । अथ तथावेशो निरन्तरं यदि घटिकाद्वयमभ्यस्यति चुम्बके वक्त्रे समस्तबाह्यसद्रूपभावराशिनिष्ठचुम्बनात्मनि निगिरणप्रवृत्ते काकचञ्चुपुटाकारे सद्वृत्तिरूपसोमस्वभावपरमशीतलरसास्वादकारिणि सति नाभिमुद्रितं नाभिस्थानावधि कृत्वा [2]पूर्णकुम्भकसमावेशाभ्यासेन, तदा मन्त्रमुद्रासमूहः देहे वाग्रूपे कालरूपे च [3]परेशस्यैवाभिव्यज्यते बुद्धिरूपे च प्रत्यगात्मनि प्रकाशते, ज्ञानक्रियावेशाद्यथा [4]प्रश्ने कृते झटिति प्रतिभासते, अतीतानागतवर्तमानं तत्सर्वमवितथमेव भवति । [5]तथाभूततेजश्च सामान्याकारमन्त्रमुद्रावेशाभ्यासे दृढीभूते तमेवाभ्यासं निरन्तरं मध्ये विच्छेदशून्यमेकरसं सकृद्विभातं प्रहरपर्यन्ततां यदि नयति, यां कांचिन्मन्त्रदेवतां मुद्रादेवतां वा हृदये संधीयते; तदा [6]तामेव रुद्रशक्तिभिर्निरन्तरसमावेशावष्टम्भनवीर्यरूपाभिराकृष्टामानीतां[7] साक्षाद्रूपेण स्वशरीरतादात्म्येन प्रतिपन्नामाकृतितः[8] पश्यति । [9]तथा प्राप्तेऽपि यदि समावेशं न त्यजति तदा प्रहरद्वयं निरन्तरं समाविष्टो देह-

---

१ हृदयरूपस्यान्तर्लीनस्य कृते इति पाठान्तरम् । २ पूरककुम्भकेति पाठान्तरम् । ३ परवशस्येवेति पाठान्तरम् । ४ प्रकटने कृते इत्यपि पाठः । ५ तथा भूते चेति पाठान्तरम् । ६ तमेवं रूपशक्तिभिः इति पाठान्तरम् । ७ आसादितामिति पाठान्तरम् । ८ आकृतितः कालतश्चेति पाठान्तरम् । ९ तथा स्वीकारे प्राप्ते इत्यपि पाठः ।

प्राणादिकं स्वकं न किंचित् पश्यति [1]निरावरणं चिद्रूपघनमेव सकलमवलोकयति । तथा एतस्मिन् सर्वदा यावदतिपरिक्षीणेन देहेन अन्यशरीरकल्पेन अविच्छेदे पुनरपि यदा समावेशाभ्यासं न परित्यजति, यदा प्रहरत्रयं निरन्तरं सकृद्विभातविभेदवन्ध्यस्वरूपे समावेशशालिनि तिष्ठति, तदा मातरो ब्राह्म्यादिकाः, योगेश्वर्यश्च तच्चक्राभ्याससिद्धाः वीराश्च अघोरादयः, वीरेश्वराः नवात्मदेवताप्रभृतयः समुन्मीलयन्ति । तच्चक्राभ्यास[2]जातविभूतयश्च सिद्धा जायन्ते । एते महता भैरवबलेन युक्ताः । यश्च शाकिनीनां शक्तीनां खेचर्यादिभेदभिन्नानां संबन्धी गणो वर्गः भैरवबलेन बलवान् । एते, सर्वे परमां सिद्धिं धरण्यादिशिवान्ताध्वविषयां अनेनैव देहेन [3]स्वतन्त्रतां ददति । यतः एते सर्वे [4]मातृप्रभृतयो देवताविशेषाः "समयं दत्त्वेति" मर्यादापूर्वकं भैरवेण भगवता स्वरूपाविभेदेन स्वरूपावभासनेन भैरवचक्रानुजीवितत्वेन प्रकर्षेण [5]चोदिताः । सर्वे एते देवताचक्रेश्वरा[6]स्तदाविष्टप्राणा [7]भैरवभूता एव, अतस्तदनुगामिन्यो भवन्ति । तदुक्तं "आगत्येति" । विशिष्टं किञ्चिदेकतमं उत्तममध्यमाधमफलराशिमध्यात् खड्गगोरोचनोद्दिष्टपातालादिफलं हृदयेऽभिसंहितं भवति, तदा तदपि प्रयच्छन्ति ॥ १६ ॥

यथा अन्येषां प्राणनाडिजयप्रभृतीनां योगानां विशिष्टचर्यासामग्र्यादिबाह्यापेक्षावशात् कालवेलादिसंकोचः

---

१ निरावरणेति पाठान्तरम् । २ वीरेश्वरा नवात्मदेवताप्रभृतयः तच्चक्राभासेति अधिकः । ३ स्वातंत्र्यमिति पाठान्तरम् । ४ मात्रा इति पाठान्तरम् । ५ भावितेति पाठान्तरम् । ६ तदाविष्टप्राणादिश्चेति पाठः । ७ भैरवभूत एवेति पाठान्तरम् ।

यथोक्तम्

'कुलबीजकमस्यान्तर्भोगः कौलं कषादिषु'।

इति। तथा अत्र न कश्चिदवच्छेद इति समादिशति-

अनेन सिद्धाः सेत्स्यन्ति साधयन्ति च मन्त्रिणः ॥१७॥

अयं त्रिष्वपि कालेषु अविशिष्ट इत्यर्थः ॥ १७ ॥

ननु किं तत् साधयन्ति[1] अनेनेत्याह

यत्किंचिद्भैरवे तन्त्रे सर्वमस्मात् प्रसिद्ध्यति ।

मन्त्रवीर्यसमावेशप्रभावान्न नियन्त्रणा* ॥ १८ ॥

यदन्यशास्त्रेषु किंचित्साध्यमुक्तं तत्सर्वमनेनैव सिद्ध्यतीति का अत्रासाध्यगणनेति[2] यावत्। ननु केन विधानेनायं मन्त्रो ग्राह्य इत्याशङ्क्योत्तरमाह– 'अस्मिन्नये न कदाचिन्नियन्त्रणा'। एतत्प्राप्तिमात्रमेव[3] साध्यं, नत्वत्र विद्याव्रतादि किंचित्सहकारिभावेनोपयोगि केवलं परिक्षीणशङ्कातङ्कत्वमत्र उपयोगि शङ्कायाः सन्देहविप्रतिपत्तिसारतया एकरसतद्विमर्शात्मकसमावेशविघ्नभूतत्वादिति स्फुटीक्रियते ॥ १८ ॥

अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः ।

स सिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ॥१९॥

अनेन ज्ञातमात्रेण ज्ञायते सर्वशक्तिभिः ।

शाकिनीकुलसामान्यो भवेद्योगं विनापि हि ॥ २० ॥

अविधिज्ञो विधानज्ञो जायते यजनं प्रति ।

आसतां तावदन्ये विधयः[4], मण्डलदर्शनोपलक्षितमधिवासनादि हाहावधिपर्यन्तं मन्त्रार्पणविधिजातमपि न किञ्चि-

१ साधयत्यनेनेति पाठान्तरम्। २ साध्यानामिति पाठान्तरम्। ३ एतत्प्राप्तिरेव साध्येति पाठान्तरम्।

* 'मन्त्रवीर्यसमावेशे न कदाचिन्नियन्त्रणा' इति पाठान्तरम्।

४ अन्यो विधिः इति पाठान्तरम्।

दत्रोपयोगि । एवमिति उक्तं वक्ष्यमाणं च यस्तत्त्वता निःशङ्कतया वेत्ति, स भुक्तिमुक्तिरूपसिद्धिभागी । स एव परमार्थतो योगेन समावेशलक्षणेन युक्तः । स एव सत्यतः शिवतादानभेदपाशक्षपणलक्षणां दीक्षां प्राप्तः । एतज्ज्ञानमात्रादेव सर्वशक्त्युपलक्षितोऽसौ संपूर्णस्वरूपो [1]ज्ञायते [2]सिद्धो भवतीत्यर्थः । [3]एतत्समावेशाभ्यासाद्योगं विनापि* शाकिनीकुलेन देवताचक्रेण सामान्यस्तुल्यो भवति अनेन ज्ञातमात्रेण सर्वस्य वस्तुनः पूरणात् । यजने यत् विधानमितिकर्तव्यता, तामविद्वानपि विद्वानेव भवति पूर्णतत्फललाभात् । [4]यस्तु लौकिकवैदिकशैववामदक्षिणकुलादिप्रसिद्धान्* [5]विधीन्विधित्वेन न जानाति, स एव [6]अत्र यजने विधिज्ञो जायते अनुत्तरविधिं यतो जानाति । अनुत्तरसंविन्मात्ररूपे सर्वमन्यत् बहिरङ्गं भवति ॥ २० ॥

ननु 'चतुर्दशयुतं' इत्यनेन यत् बीजमुक्तं, तत् कथं विश्वाविभागिसंपूर्णशक्तिकस्वात्मरूपपरदेवतापरामर्श[7]मयं भवतीति निरूपयति—

कालाग्निमादितः कृत्वा मायान्तं ब्रह्मदेहगम् ॥ २१ ॥

---

१ जायते इत्यपि पाठः। २ प्रसिद्धि इति पाठान्तरम् । ३ यतः समावेशाभ्यासलक्षणं योगं इति पाठान्तरम् । ४ यश्चेति पाठान्तरम । ५ विधित्वेन नियंत्रणात्वेनेति पाठान्तरम् । ६ स एवात्र यजने इति पाठान्तरम् । ७ रूपमित्यपि पाठः ।

* विनापि—इत्यनन्तरमयं पाठोऽधिको दृश्यतेः—"शाकिनीकुलं शक्तिचक्रेश्वरमेकं यास्यन्ति निश्चिन्वति । भगवत्यो देवतास्तासां माननीयः तच्चक्रेश्वरतायोग्यत्वलाभात् [योगबलाद्भवति] इति ।

* प्रसिद्धानित्यनन्तमयमधिकः पाठः — शङ्कासङ्कोचकार्यकारणाभाववृत्तिविधीन्— इति ।

शिवो विश्वाद्यनन्तान्तः परं शक्तित्रयं मतम् ।
तदन्तर्वर्ति यत्किंचिच्छुद्धमार्गे व्यवस्थितम् ॥ २२ ॥
अणुर्विशुद्धमचिरादैश्वरं ज्ञानमश्नुते ।
तच्चोदकः शिवो ज्ञेयः सर्वज्ञः परमेश्वरः ॥ २३ ॥
सर्वगो निर्मलः स्वच्छस्तृप्तः स्वायतनः शुचिः ।
यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ॥ २४ ॥
तथा हृदयबीजस्थं जगदेतच्चराचरम् ।

*यथा घटशरावप्रभृतिप्रपञ्चवर्जने मृण्मात्रमेव सत्यं, मृद्रूपतात्मकप्रपञ्चवर्जनेनापि गन्ध इत्येव सत्यं गन्धरूपताविशेषापरामर्शे अहमित्येव सत्यं, तथाभूतभेदभङ्गेऽपि सुखदुःखमोहरूपता सारम्, सुखादिवैचित्र्यकर्तने वेद्यवेदकमात्ररूपता, [1]पर्यन्ते वेद्यवेदकरूपभेदविगलने सदित्येव अवशिष्यते, तत्रापि वर्णत्रयपरामर्शविशीर्णताकरणे आद्यवर्ण[2]मात्रविश्रान्तिः, तथा जलतत्त्वादेरपि मायातत्त्वपर्यन्तस्य वेद्यरूपस्याशुद्धाध्वमध्यपातिनः सर्वस्यैवान्त्यविश्रान्तिकाले सर्वमेकघनममृतमात्मभूतम्, [3]सैव ब्रह्मतापत्तिः ब्रह्मवादिनां विश्रान्तिः तन्निर्मथनप्रवृत्त्या [4]तु भैरवोऽपि, विश्वसृष्टिकारी । गीतं च

'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥' (भ०गी०१४।३)

इति । तस्यापि [5]यदा [6]सन्मात्रविश्रान्तिधाम्नः स्वरूपभेदवि-

१ पार्यन्तिकीति पाठान्तरम् । २ वर्णमनुत्तरमात्रेत्यपि पाठः । ३ सैवेति पदं नास्ति क. पाठः । ४ अत्रेति पाठान्तरम् । ५ यथेति पाठान्तरम् । ६ संविन्मात्रेत्यपि पाठः ।

* गन्धरूपताविशेषः परामर्शतः घट इत्येव सत्यं तथाभूतं जगदेतच्चराचरमित्यधिको पाठो दृश्यते ।

गलनेन रूपं परामृश्यते, तदा प्रकाशविमर्शनशक्तिरूपेऽनुप्रविष्टस्य तस्यावभासनमिति तच्छक्तिस्वरूपात्तदभिन्नं परमार्थत इति शक्तिस्वरूपमेवावशिष्यते इति । तच्च इच्छा वा क्रिया वा ज्ञानं वा यतः सर्वं वस्तु इच्छामि करोमि जानामि वा इत्येवंभूतविमर्शशक्तिविश्रान्त्या विना न जातुचिदवभाति । इच्छामीत्यत्र च शक्तित्रयानुवेधनमेवं जानामि करोमीत्यत्रावियुक्तत्वादास्ताम् । तेन शक्तित्रयात्मकस्वरूपविश्रान्तं तदवभासमानं भवति । तस्यापि शक्तित्रयस्य एकमेव [1]स्वतन्त्रं स्वरूपं स्वातंत्र्यादेव । अथ अधऊर्ध्वग्रन्थिरूपं बिन्दुद्वयमयं संविदात्मकं परभैरवदेवतात्मकं तात्त्विकं वपुः । तदेतद्वेद्यवेदनवेदकविश्रान्तित्रयमयं [2]वर्णत्रयस्वरूपं तत्त्रयम् । तत्र यां विश्रान्तिं प्रधानीकरोति तदन्तमेवोच्चारणं [3]त्रिधा संपद्यते । [4]तत्त्रयोपभोगे भुक्तिमुक्तिरिति क्रमेण सिद्धयः [5]यत्र तदेकघन[6] एव एकः परामर्शो [7]विश्रान्तिस्थानमक्रमं सर्वं सद्रूपमिच्छादिद्वारेण परभैरवे विसृज्यते क्षिप्यते, [8]परभैरवे चाभेदेन [9]तदिच्छादिद्वारेण वेद्यतया बहिर्विसृज्यते इति नैसर्गिकसद्रूपं वेद्यं भैरवात्मकवेदकस्वरूपमित्युभयस्प[10]र्शनाच्छक्तिरूपतेति चातुर्दशी वेदकवेदनरूपावरोहेण वेद्याभिन्नसामान्यरूपता ब्राह्मी विश्रांतिः,- इत्येवंभूतविश्रांतित्रयमय[11]शान्तोदिततदुभयलक्षणत्रयैकरसताकारि परं विसर्गतत्त्वं संविद्भैरवनाथ एवेति तात्पर्यार्थः । योजना तु— कालाग्नि

---

१ स्वतन्त्रं रूपमिति पाठान्तरम् । २ चरणत्रयेति पाठान्तरम् । ३ इति त्रिधेति पाठान्तरम् । ४ तत्र भोग उभयभुक्तिरिति पाठान्तरम् । ५ यस्य तु । ६ तदेकघट इति पाठान्तरम् । ७ विश्रांतिस्थानक्रममित्यपि पाठः । ८ परभैरवेच्छाभेदेनेत्यपि पाठः । ९ तदिच्छेति पाठान्तरम् । १० विमर्शनादिति पाठः । ११ शान्तादि-इति पाठान्तरम् ।

पृथ्वीतत्त्वं सप्रथमभुवनमादितः [1]कृत्वा मायातत्त्वपर्यन्तं [2]तृतीयब्रह्मणि [3]विश्रान्तम् । विश्वेत्यादिक्रमेण यत् भैरवदेवताचक्रं परभैरवीयं शक्तित्रयरूपं शक्तिचक्रं, तदनन्तस्य विसर्गस्यान्तर्विद्यते । [4]तस्य च यश्चोदकः- प्राणेन विना सर्गचोदनानुपपत्तेश्चतुर्दशः प्राणरूपः, स एव शुद्धाध्वनि विद्यातत्त्वादिके [5]शिवतत्त्वान्ते व्यापकः । यतोऽत्र स परमेश्वरो वेद्यभूतदेहादिसङ्कोचविगमात् सन्मात्रप्रमातृस्वभावत्वात् भिन्नस्य भिन्नाभिन्नस्य च सर्वस्य ज्ञाता कर्ता च । परमेश्वरो विद्येश्वरवर्गात्प्रभृति मायासङ्कटान्तः[6]पातिताभावात्सर्वगः, पाशैरागन्तुकैर्वियोगान्निर्मलः, सहजाणवमल[7]वैकल्यासंभवात् स्वच्छः, क्रमेण वेद्यराशेरिदमित्येवंभूतस्याहमित्येवाच्छादनेन व्यतिरिक्तवेद्याकाङ्क्षावियोगात् तृप्तः, स्वायतनः स्वात्मन्येव यतमानः प्रबुद्धानन्दः, तत एव भेदलक्षणाशुद्धितिरोधानात् शुचिः । एवं बोधक[8]स्वरूपमयत्वात् योऽणु[9]स्तच्चोदकविश्रांतिसमावेशाभ्यासनिष्ठः, सोऽचिरादेव तदन्तर्वर्तिशुद्धविद्यादिशिवान्ततत्त्वान्तर्गत[10]शुद्धाध्वावस्थितमीश्वरस्य संबन्धि ज्ञानं तदाक्षिप्तं च कर्तृत्वं विशुद्धं परापररूपमश्नुते प्राप्नोति । [11]एतच्च विश्रान्तित्रयाभ्यासे [12]तत्तत्फललाभोपलक्षिततुरीयपरविश्रान्तौ सर्वमभेदैकरसेनास्ते । यथाहि [13]न्यग्रोधधानायां महावृक्षस्तदात्मकस्वरूपशक्त्यभिन्न एव भवति, तथा हृदयात्मनि बीजे चरं शुद्धं, अचरमशुद्धं; चरश्च प्रमातृ, अचरं

---

१ छित्वेत्यपि पाठः । २ तृतीयं ब्रह्मणोरूपे इति पाठान्तरम । ३ विश्रान्तं परं प्राणमित्यपि पाठः । ४ तस्यांग्रेऽयमधिको पाठः- अतः [अन्तः] परो यदपेक्षयेति । ५ शिवान्ते इति पाठान्तरम । ६ पतित्वाभावादिति पाठान्तरम् । ७ वैकल्पसंभावनादन्यः इति च । ८ चोदकस्यैवंभूतरूपमयत्वादित्यपि पाठः । ९ एतच्चोदकविश्रांतेः समावेशोऽभ्यासेति पाठान्तरम । १० शुद्धाशुद्धेति च क० पाठः । ११ एतद्विश्रांतिभासे इति पाठान्तरम् । १२ तत्तत्फललाभोपलक्षणं चतुर्थ्यन्तपरमिति च पाठः । १३ न्यग्रोधनामा इति पाठान्तरम् ।

प्रमेयमिति सर्वं हृद्गतशक्ति[1]कलाया अविभागेनैव [2]भावीति ॥ २४ ॥

तदत्र 'सद्यो योगाविमोक्षदम्' इति यत् पूर्वं सूचितं परभैरवसमावेशफलं, तदुपसंहारद्वारेण प्रकटयति

एवं यो [3]वेत्ति तत्त्वेन तस्य निर्वाणगामिनी ॥ २५ ॥
दीक्षा भवत्यसन्दिग्धा तिलाज्याहुतिवर्जिता ।

एवमिति– उक्तप्रकारेण हृदयं [4]तत्त्वेन निश्चयेन निःशङ्कतया यो वेत्ति तस्य [5]दीक्षा तत्त्वेन [6]परमार्थेन [7]निर्वाणं फलत्वेन गम्यते यया सा असंदिग्धा स्वप्रत्ययेनैव एतद् हृदयस्वरूपलाभ[8]युक्ता भवति । भैरवदेवताभिर्हृदयान्तर्गताभिः स्वरूपनिमीलनात्मकप्रपञ्चस्पन्दपरिवर्जनेन स्वरूपोन्मीलनात्मकपरिस्पन्दप्रवणाभिर्दत्तमेतद् हृदयलक्षणं परं ज्ञानं [9]क्षपितश्च संकोचात्मकमूलपाश इति जानात्येव । तेन [10]दानक्षपणलक्षणां [11]दीक्षां [12]स्वप्रकाशं नयेत् । न अत्र तिलादीनामुपयोगः । एतावता जीवन्मुक्त्यात्मकपरमसिद्धिपरिनिष्ठितधियं[13] प्रति [14]अन्यलाभादिकं न किंचिदुपयुज्यते इत्युक्तम् ॥ २५ ॥

अधुना तु समावेशाभ्यासोपयोगी पूजाविधिर्वक्तव्यो यतो वक्ष्यते "कृतपूजाविधिः सम्यक्" (३३ श्लो०)

---

१ 'कलायाः इति च' पाठः । २ 'भवती' पाठान्तरम् । ३ 'वेदेति' पाठान्तरम् । ४ तत्त्वो– इति पाठान्तरम् । ५ दीक्षेति पदमन्यत्र नास्ति । ६ परमार्थेन भवतीति पाठान्तरम् । ७ निर्वाणफलत्वेन गच्छति यस्य सा असंदिग्धेति पाठान्तरम् । ८ लाभो भवतीत्यपि पाठः । ९ क्षपितसंकोचात्ममूलपाश इत्यपि पाठः । १० दानक्षपणलक्षणा इति च पाठः । ११ दीक्षेति च पाठः । १२ स्वप्रकाशं [ स्वप्रतीतिं ] इति पाठान्तराणि । १३ हृदयमित्यपि पाठः । १४ हृदयलाभेति पाठान्तरम् ।

इति । तदत्र देहप्राणभुवि बुद्धिपदे च समावेशाभ्यास इति । तत्र हृदयमात्मसात्कर्तुं न्यासं दर्शयति ।

मूर्ध्नि वक्त्रे च हृदये गुह्ये मूर्तौ तथैव च ॥२६॥
न्यासं कृत्वा शिखां बद्ध्वा सप्तविंशतिमन्त्रिताम् ।
एकैकेन दिशां बन्धं दशानामपि कारयेत् ॥ २७ ॥
तालत्रयं पुरा दत्त्वा सशब्दं विघ्नशान्तये ।
शिखासंख्याभिजप्तेन तोयेनाभ्युक्षयेत्ततः ॥ २८ ॥
पुष्पादिकं क्रमात्सर्वं लिङ्गं वा स्थण्डिलञ्च वा ।

पुरा पूर्वं तालत्रयं [1]हृद्बीजकलात्रयविश्रान्तित्रयरूपं वैखरीशब्दपर्यन्तं स्वात्मना दद्यात् । तत्स्वीकारकं स्वात्मानं विघ्नानां चतुरण्डगतभेदाभिमानसङ्कल्पानां शान्तये [2]बहिरन्तश्च पादपाणिहस्तमुखशब्दक्रमेण पातालभूम्यन्तरिक्षगतभेदविघ्नशमनाय कुर्यात् । एवं कृत्वा मूर्धादिस्थानतादात्म्यापत्तिभाजि हृदयस्थाने एव दण्डभङ्गिभाजि हृदयबीजेन पञ्चकृत्व उच्चारितेन जन्मचारप्रवाहलयविच्छित्तिलक्षणचिदानन्देच्छाज्ञानक्रियालक्षणस्पन्दपञ्चकभाङ् न्यासं शरीरे कुर्यात् । शिखायाश्च तद्देहगतमूर्धादिपञ्चशक्तिकब्रह्मपञ्चकाविभागभूमिभाजः प्राणबुद्धिरूपायाः पञ्चकस्य प्रत्येकं पञ्चकभेदात्प्रथमचरमकोटिद्वयभेदस्पर्शाच्च सप्तविंशतिकृत्व उच्चारितेन हृदयबीजेन हृदयरूपताविश्रमणरूपं नियन्त्रणात्मकं बन्धं कुर्यात् । ततश्च [3]स्थानबीजरूपहृदयमयीकर्तुं दश दिशः सकृत्सकृ[4]दुच्चार्यमाणेन हृदयबीजेन बध्नीयात् हृदयरूपानुचारपरामर्शशेषा एव कुर्यात् । इत्येवं कृत्वा पुष्पादिके

१ हृदयबीजेति पाठान्तरम् । २ बहिः स्वपाणिहस्तेति पाठान्तरम् ।
३ स्थानरूपीति पाठान्तरम् । ४ उच्चारितेनेति पाठान्तरम् ।

पूजोपकरणे ऽपि अर्घ्यपात्राविश्रान्तपरमानन्दरसस्य सप्तविंशतिकृतोच्चारितेन हृदयबीजेन हृदयतादात्म्यं कृत्वा तद्रसाभ्युक्षणद्वारेण हृदयतादात्म्यं कुर्यात् । अनन्तरं पूजाधारस्य लिङ्गस्थण्डिलादेः । एवं सामान्येन भेदं विलाप्य[1]देहप्राणाधिष्ठितमपास्य तदुपास्ययागगृहे ऽप्यपोह्य पूजोपकरणेषु पराकृत्य पूजाधारे ऽपि निराकुर्यादिति तात्पर्यम् ॥ २८ ॥

एवं कृते सति पश्चात्तत्र [2]पूजाधारे बाह्याभ्यन्तरादिबहुभेदशतान्यतम[3]रूपे यथारुचि यथासंभवपरिगृहीते[4] लिङ्गस्थण्डिलमण्डलादिके पूज्यपरिकल्पनापूर्वकं [5]पूजास्वरूपमाह

चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना ॥ २९ ॥
तत्र सृष्टिं यजेद्वीरः पुनरेवासनं ततः ।
सृष्टिं तु संपुटीकृत्य पश्चाद्यजनमारभेत् ॥ ३० ॥
सर्वतत्त्वसुसंपूर्णां सर्वावयवशोभिताम् ।
यजेद्देवीं महाभागां सप्तविंशतिमन्त्रिताम् ॥ ३१ ॥
ततः सुगन्धिपुष्पैश्च यथाशक्त्या समर्चयेत् ।
पूजयेत्परया भक्त्या स्वात्मानं च निवेदयेत् ॥३२॥

चतुर्दशेति– जाग्रदादितुर्यावस्थान्तदशाचतुष्टयव्याप्तिशालि यदेतदौकारान्तं बीजस्य वपुः, तावत्यां व्याप्तावासनं कल्पनीयम् । तथाभूतौकारविश्रान्ता[6] आदिक्षान्ता सृष्टिर्विसर्गशक्तिस्वीकृता उपरिवर्तिनी भावनीया । सर्वाभेदघनतु-

---

[1] देहप्राणादिष्विति पाठान्तरम् । [2] पूजाधारेष्वपीति क. पाठः । [3] रूपेवेति पाठान्तरम् । [4] परिगृहीतेति पाठान्तरम् । [5] पूजास्वरूपावगमादिति पाठान्तरम् । [6] विश्रान्ता इत्यनन्तरं सर्वैर्वा– इति पदमास्ति ।

र्यातीतवृत्तिविश्रान्त्यां तस्यां यत् विश्रमणं विसर्गः, स एव यागः । तस्यामपि च तुर्यातीतवृत्तौ विसर्गकलायां स्वीकृतसकलसृष्टिकार्यायां तदेव जाग्रदादिदशाचतुष्कक्रोडी-कारकमौकारान्तं रूपं प्रक्षिप्य यजेत् [1]यन्मध्यवर्त्तिविसर्ग उभयकोटि[2]गतसद्वृत्तिस्पर्शी, विसर्गा[3]त्मरूपामत एव सर्व-तत्त्वमयीं सर्वैश्च अवयवायमानैर्भावराशिभिर्युक्तां महेशान-स्य परभैरवस्य अभेदेन वर्तमानां श्रीपरादेवतामनुत्तरस्व-रूपां स्वीकरोति । एतदुक्तं भवति । हृदयस्य मूलभागे [4]सद्वृत्तिरूपे वेद्यांशे जाग्रत्स्वप्नसुषुप्तात्मकातिस्फुटस्फुटास्फु-टास्फुटभेदत्रयशालिनि सर्वदा सन्मात्रप्रथमकलावपुषि वि-श्रम्यावृत्तौ अनुत्तररूपायां शक्तिशिवतत्त्वान्तं क्रमेण तुरी-यपदपर्यन्तं विश्रान्तेन क्रमाभिन्नसमस्ततत्त्वस्वीकरणादास-नव्याप्तिः प्रदर्शिता भवति । ततो विसर्गात्मिका षोडशी भैरवात्मिका कला यावत् सर्वोत्तीर्णा स्पृश्यते, तावत् तस्यां सर्वमभेदेन आस्ते इति समस्ताभेदरूपा सप्तदशी यासौ कला, सैव अनुत्तररूपा याज्या । तस्यां [5]तथा प्रवर्तिता विश्रान्तिः । स एव परमार्थतो यागः । तद्रूपतासिद्ध्यर्थ-मेव तु सुगन्धिभिरयत्नत एव हृदयानुप्रवेशशालिभिः पुष्पै-[6]र्हृदयान्तःस्वरूपसमर्पणादेव हृदयस्य पोषकैर्बाह्याभ्यन्तरैः सर्वैर्द्रव्यैर्यथाशक्तितया, अस्वीकृतशक्तिस्वरूपस्य सङ्कुचित-वृत्तेर्यागं प्रत्ययोग्यत्वात् शक्त्या स्वरूपविकासरूपया तदु-पयोगिन्यापि बाह्यया आनन्दिन्यां स्नानविलेपनधूपताम्बू-

---

१ येनेति पाठान्तरम । २ गतस्वरसद्वृत्ति- इति पाठान्तरम । ३ सर्वातीतरूपामित्यपि पाठः । ४ सद्व्याप्तिरूपवेद्यांशे इति पाठान्तरम । ५ तथा इत्यनन्तरमयं पाठोऽधिको दृश्यते - तथा पूरणा [ पूर्णा ] अत एव सप्तविंशतिकृत्वः [ कृत्व ] प्रवर्तितेति । ६ हृदयान्तेति पाठान्तरम् ।

लासवादिसंभारसुभगया बाह्यद्रव्यशक्त्या सम्यगर्चयेत् । कथम् , परया भक्त्या परिमितस्य देहप्राणपुर्यष्टकादेरप्रधानताकरणेन तद्रूपतानिमज्जनात्मकप्रह्वीभावसंपादनपुरःसरेण तदुक्तरूपयाज्यदेवतात्मकपरसंविद्रूपप्रधानत्वापादनलक्षणेन भजनेन [1]श्रद्धातिशयेन समावेशदायिनेत्यर्थः । परा चासौ भक्तिः । पुष्पादेर्यागोपकरणस्य स्वात्मह्रदयह्रठानुप्रवेशसुन्दरो यो भागो रमणीयः परिमलः तेन पूर्यमाणमात्मानं सर्वाभेद[2]रूपवृत्तिनिश्चयात्मना नियमेन [3]वेदयेत् । सप्तविंशतिकृत्वः[4] उच्चारणावसरे तत्तत्पुष्पादिबाह्याभ्यन्तरभावराशि[5]संपूर्यमाणाभिन्नस्वरूपं श्रीपरादेवतामयमात्मानं यथा वेत्ति, तथा पुनःपुनरात्मस्वरूपं परामृशेदिति यावत् । एषा [6]तावत्स्फुरणरूपा पूजा । ततश्च जठरीकृतसमस्तभोग्यस्वभावतत्त्वप्रसरस्य भोक्तुर्भगवतो भैरवस्य उद्दीपनात्मना होमेन तदन्तःकृतसंस्कारशेषभोग्यस्वभावविलापनदहनसामर्थ्यात् परामर्शः कर्तव्यो येन जीर्णन्यायेन संस्कारस्य बीजरूपतया [7]सुषुप्त्यवस्थावत् पुनरुत्थानलक्षणसंस्कारात्मकमूलभेदप्रसवमहाव्याधिशङ्का शाम्यतीति ॥ ३२ ॥

अनेनाभिप्रायेण यजनमुपसंहरन् होमं सूचयति

एवं यजनमाख्यातमग्निकार्येऽप्ययं विधिः ।

तत्रापि तिलादीनां शिखासंख्याभिजप्तेन तोयेन अभ्युक्षणं स्रुक्स्रुवादीनां वह्नौ "चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना" इत्यादिसंपुटीकरणपर्यन्तं याज्यदेवतासमर्पणम् । ततस्ति-

---

१ सद्य अतिशयेनेति पाठान्तरम् । २ रूपां वृत्तिमिति पाठान्तरम् । ३ नियमयेत् इति पाठान्तरम् । ४ कृत्वोच्चारणावसरे इति पाठान्तरम् । ५ संपूर्यमाणां निजस्वरूपमिति पाठान्तरम् । ६ तावत्पूरणरूपेति पाठान्तरम् । ७ सुषुप्त्यवस्थादृष्टान्तेन [सुषुप्तावृत्तान्तेनेति ?] पाठान्तरम् ।

विसर्गात्मकं यतश्च अन्या पञ्चदश तिथयो विकसन्ति, तच्च सर्वतिथीनां[1] मध्यगतम् । तत् हृदयपद्मे पूर्ववत् ध्यायेत् । ‡एतद्बीजापेक्षया आद्यन्ताभ्यां व्यञ्जनविसर्गाभ्यां रहितं त्रिशूलवृत्तिमात्ररूपं, विकसत् तिथिषु प्राणापानकलासु मध्यगतं तत्प्राणरूपसमावेशकारि तद्द्वारेण देहं समाविशत् बीजरूपेण हृदि ध्यायेत् । अवर्गे स्थिता वर्णाः । आदयः स्वराः, अन्त इति यः 'तदन्तः कालयोगेन' इत्यत्र विसर्ग उक्तः; तेन स्वरविसर्गाभ्यां रहितमनच्कसद्वृत्तिरूपं बीजं तथैव [2]विकासिनीषु प्राणापानकलासु मध्यगतं देहे हृदि ध्यायेत् ॥ ३४ ॥

[3]अत्र फलमाह—

यान्यान् कामयते कामांस्तान्ताञ्छीघ्रमवाप्नुयात् ।
अज्ञः प्रत्यक्षतामेति[4] सर्वज्ञत्वं न संशयः ॥ ३५ ॥
एवं मन्त्रफलावाप्तिरित्येतद्रुद्रयामलम् ।
एतदभ्यस्यतः सिद्धिः सर्वज्ञत्वमवाप्नुयात् ॥ ३६ ॥

एताश्च सिद्धय उक्ता एव, एषु 'कालाग्निमादितः०' इति अत्र 'शीघ्रमिति' '[5]मुहूर्तं स्मरते यस्तु' इति '[6]अस्मात् प्रत्यक्षतामेति सर्वज्ञत्वं' इति च प्रहरत्रयमात्रेण सिद्धिरुक्ता । प्रहरचतुष्कविभेदेन समावेशे तु सर्वस्मिन्नेव प्रकाशमये दिनरूपतां गते शर्वरि सङ्कोचे क्षीणे अनेनैव देहेन भैरववत् सर्वज्ञो भवति । एतदुपसंहरति— 'एवमिति' एवं सर्वेषां

---

१ बीजानामिति पाठान्तरम् । २ विकसत्सु इति पाठान्तरम् । ३ तत्र क. पाठः । ४ यातीति पाठान्तरम् । ५ मुहूर्त्तादिनामिति पाठान्तरम् । ६ अग्नेः प्रत्यक्षतामिति पाठान्तरम् ।

‡ अयं पाठोऽधिको दृश्यते:- इह विशेषभोग्यस्वभावविलापनदहनपरामर्शः कर्तव्यः विसर्गांशसमावेशः ।

[1]मन्त्रफलानां [2]परापरासिद्धिरूपाणां यस्मादित एव अनुत्तरबीजादवाप्तिः, अतो हेतोरेतदेव सपादकोटिरुद्रयामलफलसंपादकत्वात् रुद्रयामलं शिवशक्त्योरत्र नित्यसंघट्टात् । अत एव एतदभ्यस्यतः संक्षेपतः फलं सर्वज्ञत्वसर्वकर्तृत्वलक्षणभैरवरूपतालाभ इत्याह

'एतदभ्यस्यतः............'

इति । अभ्यासेन विनापि तु जीवन्मुक्तता परमा कौलिकीसिद्धिरिति शिवम् ॥ ३६ ॥

—:० ०:—

यदाखूनविशीर्णं सद्गोपितं तन्त्रभाषया ।
अत्राभिनवगुप्तेन भासितं[3] तदनुत्तरम् ॥ १ ॥
एतद्विवेकनिष्ठास्तु मा भूत श्रममार्जनम् ।
सच्छिष्याः प्राप्नुताद्यैव[5] भैरवीभावसंपदम् ॥ २ ॥
संपूर्णानुत्तरानन्दयोगक्षेमादि[6] जानताम् ।
त्रिलोकीकवलीकारसमावेशविशारदाः ॥ ३ ॥
यस्यां सदात्मना पूर्णमिच्छाज्ञानक्रियात्मना ।
विसृज्यते यतश्चेमां वन्देऽनुत्तरसंविदम् ॥ ४ ॥

---

१ मन्त्रकलानामिति पाठान्तरम् ।
२ परापराणां कौलिकीसिद्धि इत्यपि पाठः ।
३ भाषितमित्यपि पाठः ।
४ भाजनाः इति पाठान्तरम् ।
५ प्राप्नुयादेव इत्यपि पाठः ।
६ भिजायतामिति पाठान्तरम् ।

लाज्यादिहवनं संपूर्णरूपतया 'आत्मानं च निवेदयेत्' इति व्याख्यातेन क्रमेण पूर्णाहुत्यार्पणमिति अग्निकार्यविधिः । एवं यागहोमोभय[1]मेलनात्मकं पूर्णं हि पूजायाः स्वरूपम् ॥

इयता च स्वात्मरूपा श्रीभगवती परा देवी सम्यक् पूजिता भवति । यतोऽन्तर्मलस्य [2][3]विगलनं [4]यावन्न जातं तावत् स्फुटसंविदात्मकत्वं पूरितं न भवति, ततो पूजैवेयमित्याभ्यन्तरसंकल्पनिवृत्त्या बाह्यद्रव्यसंहरणेनैतदाह

कृतपूजाविधिः सम्यक् स्मरन् बीजं प्रसिद्ध्यति ॥३३॥
आद्यन्तरहितं बीजं विकसत्तिथिमध्यगम् ।
हृत्पद्मान्तर्गतं ध्यायेत् सोमांशुं नित्यमभ्यसेत् ॥३४॥

सम्यगिति उक्तप्रकारेण कृतपूजाविधिः, सम्यगिति च उक्तवक्ष्यमाणोपदेशदिशा बीजं स्मरन् परामृशन् सम्यक् प्रसिद्ध्यति, परभैरवदेवतावदनेनैव देहेन समस्तविभूतिभाजनं भवति । अस्य हृदयपरामर्शस्याभिनवाभिनवरूपतया भासमानस्य पूर्वपूर्वतरादेः सम्यगनवभासमानत्वात् कालभेदयोगापहस्तनादवभासनीयस्य वस्तुनः सर्वथा [5]आभ्यन्तरस्यैव सतः प्रकाशनात् स्मरणरूपसादृश्यात् स्मरणत्वेन व्यपदेशात्, शतृप्रत्ययेन च भूताभिन्नं वर्तमानं दर्शयित्वा इदं सूचितं भवति । तथा अयं परामर्शः स्वीकर्तव्यः, यथा [6]विच्छेदशून्यः सकृद्विभातस्वभावोऽकालकलितः संपद्यते । 'सम्यक्स्मरन्निति (यत्)' उक्तं तत् सम्यक्त्वं यद्यपि पूर्वं दर्शितं

---

१ मेलनात्मकादिपूर्णं हि इति पाठान्तरम् । २ अन्तर्लीनस्येति क. पाठः । ३ विगलितमिति क. पाठान्तरम् । ४ यावत्स्वात्मरूपं नेति पाठान्तरम् । ५ सर्वदाभ्यन्तरे रहस्य इवेति पाठान्तरम् । ६ विभेदशून्य इति पाठान्तरम् ।

"कालाग्निमादितःकृत्वा·················।" (२१ श्लो०)

इत्यनेन विस्तृतग्रन्थेन तथापि स्फुटेन रूपेण निर्णीतं निरूपयति 'आद्यन्तरहित'मिति । बीजं वाचकरूपं हृदयं, तस्य वाच्यं सोमांशं सशक्तिकस्य भगवतो भैरवनाथस्य यामलं संघट्टप्रभापुञ्जस्तं वाच्यवाचकाभेदक्रमेण अभ्यसेदिति उपदेशः । सोमांशमिति पाठे तु परिपूर्णज्ञानचन्द्रात्मकं प्रकाशानन्दपरमार्थं । [1]तत एव ज्वलनगलनवृत्तिसारसंकोचविकासशक्तिप्रदर्शितविश्वोन्मेषनिमेषशतसंपादनाप्रतिहतसामर्थ्यमूलेन उत्तरोत्तरेण सकार- औकार- अःकारलक्षणेन भागत्रयेण आविष्टमनुत्तरं त्रिकोणात्मकं महाहृदयम् । तस्य च त्रयो भागा अंशाः । सोमश्च अंशश्चेति समाहारे द्वन्द्वः । तदेतत् चतुष्कमाभिमुख्येन [2]स्वसंविद्रूपहृदयविश्रान्तं सत् बुद्धिप्राणदेहभूमिपर्यन्तस्वीकारात्मना समावेशपर्यन्तं क्षिपेत् तद्रूपपरामर्शप्रधानं विगलितजडभावं तदवष्टम्भैकसारं बुद्धिप्राणदेहेन्द्रियादिकं समस्तं कुलं तत्रैव तद्रूपप्रकाशनविकासवशात् प्रकाशकुलतामायान्तं कुर्यादिति विसर्गचतुष्कसमावेशोऽनेन दर्शितः । तत्र मुख्यमेव तावत् पूर्णहृदयस्वरूपमाह आद्यन्ताभ्यामुत्पत्तिविनाशाभ्यां रहितं यत् 'विश्वस्य बीजं, तत एव बीजत्वात् विश्वात्मना विकसत् अनवरतं विकासं गच्छत् विश्वस्य कालरूपाणां तिथीनां मध्यगं साम्यरूपतया अविभागपरामर्शरूपं स्वस्मिन्हृदये संविल्लक्षणे संकोचविकासलीलायोगात्कमलरूपेऽन्तर्गतं तां संविदं प्रविश्य सङ्कोचहठापसरणकारितया विकासयत् ध्यायेत् नित्यम् । अतश्च पूर्णभैरवतासिद्धिः । उत्थानापेक्षया पाठापेक्षया च । आद्यन्तौ स्वरव्यञ्जनरूपौ । तद्रहितं यत् बीजं

[1] तदेवेति पाठान्तरम । [2] विगृह्येति पाठान्तरम ।

अभिनवरूपाशक्ति-
स्तद्गुप्तो यो महेश्वरो देवः ।
तदुभययामलरूप-
मभिनवगुप्तं शिवं वन्दे ॥ ५ ॥

समाप्ता इयमनुत्तरतत्त्वविमर्शिनी
परात्रीशिकालघुवृत्तिः—
त्रिनयनचरणसरोरुहचिन्तनलब्धप्रसिद्धीनाम-
भिनवगुप्तपादानां कृतिरिति शिवम् ॥